D.A.V. PUBLIC SCHOOL, THANE

SESSION : 2022 - 2023

PERIODIC TEST - II (HALF YEARLY EXAMINATION)

SUBJECT : SANSKRIT

Std.: VIII **Max Marks: 80**

Date:- 16/09/2022 **Time:- 2½hr**

निर्देशा: -

1. **अस्मिन् प्रश्नपत्रे चत्वार: खण्डा: सन्ति।**
2. **प्रतिखण्डम् उत्तराणि पृथक् प्रदत्तायाम् उत्तरपुस्तिकायां लेखनीयानि।**
3. **प्रत्येकं खण्डम् अधिकृत्य उत्तराणि क्रमेण लेखनीयानि।**
4. **प्रश्नपत्रे उत्तराणि न लेखनीयानि।**
5. **प्रश्नसङ्ख्या प्रश्नपत्रानुसारम् अवश्यं लेखनीया।**
6. **खण्डक्रम: अपि लेखनीय:।**

खण्ड: - क (अपठित-अवबोधनम्) 10 अङ्का:

प्रश्न: 1. अधोलिखितं अनुच्छेदं पठित्वा प्रशनानाम् उत्तराणि लिखत -

प्रकृति: मनुष्याणां माता इव अस्ति। एषा स्वच्छं विशुद्धं च पर्यावरणं दत्वा जीवान् पोषयति। जलं, वायुम्, अन्नं, पुष्पाणि, फलानि, शाकान् च सर्वेभ्य: समानरूपेण यच्छति। पशव:, पक्षिण:, जलचरा:, इत्यादय: सर्वे प्रकृते: अनुगुणम् एव स्वजीवनं यापयन्ति। किन्तु मानव: तु स्वार्थी अस्ति। स: स्वार्थलाभाय प्रकृते: अधिकाधिकं नाशं करोति। प्रकृते: सन्तुलनं नाशयति। मानव: न केवलं प्राणिनाम् अपितु स्वजीवनम् अपि संकटे स्थापयति। पर्यावरणस्य रक्षणम् अस्माकं सर्वेषां प्रमुखं कर्तव्यम् अस्ति। केवलं वैज्ञानिकानां सर्वकारस्य च एव एतत् उत्तरदायित्वं नास्ति। सर्वे जना: मिलित्वा पर्यावरणस्य रक्षायै कृतसंकल्पा: भवेयु:। जना: सम्यक् रूपेण जानीयेयु: यत् पर्यावरणस्य रक्षणे एव अस्माकं रक्षा अस्ति।

अ) एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्) **(1x2=2)**

(i) क: स्वार्थी अस्ति? (iii) का माता इव अस्ति ?

(ii) मानव: कस्या: सन्तुलनं नाशयति?

आ) पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम्) **(2x2=4)**

(i) के के प्रकृते: अनुगुणम् एव स्वजीवनं यापयन्ति? (iii) जना: सम्यक् रूपेण जानीयेयु:?

(ii) प्रकृति: सर्वेभ्य: समानरूपेण किं किं यच्छति?

इ) अस्य अनुच्छेदस्य कृते उचितं शीर्षकं लिखत - **(1)**

ई) निर्देशानुसारम् उत्तरत - (केवलं प्रश्नत्रयम्) **(1x3=3)**

(i) 'मानव: तु स्वार्थी अस्ति' अस्मिन् वाक्ये **स्वार्थी** इति पदस्य विशेष्यपदं किम् अस्ति?

(क) अस्ति (ख) तु (ग) मानव:

(ii) **'स्थापयति'** इति क्रियापदस्य कर्तृपदं गद्यांशे किम् प्रयुक्तम् ?

(क) मानव: (ख) स्वजीवनम् (ग) प्राणिनाम्

(iii) **'अशुद्धम्'** इति पदस्य किं विलोमपदं गद्यांशे प्रयुक्तम् ?

(क) रक्षा (ख) विशुद्धं (ग) सन्तुलनम्

(iv) **'मलिनम्'** इति पदस्य किं पर्यायपदं गद्यांशे प्रयुक्तम् ?

(क) स्वच्छम् (ख) सम्यक् (ग) प्रकृतिः

खण्डः - ख (रचनात्मक-कार्यम्) 15 अङ्काः

प्रश्नः 2. भवती मानसी अस्ति। भवती शैक्षणिकभ्रमणयात्रायाः शुल्कप्रदानाय पितरं प्रति लिखितं पत्रं मञ्जूषायां प्रदत्तपदैः रिक्तस्थानानि पूरयित्वा <u>सम्पूर्णं पत्रम्</u> उत्तरपुस्तिकायां लिखत - (½x10=5)

छात्रावासतः
मुम्बईनगरम्
महाराष्ट्रम्

माननीयाः पितृमहोदयाः !


सादरं (i).....

अत्र कुशलं तत्र अपि अस्तु। गतसप्ताहे एव मम (ii)..... समाप्ता अभवत्। परिक्षापत्राणि अतिशोभनानि जातानि। परिक्षापरिणामः अग्रिममासस्य (iii)..... उद्घोषयिष्यते। अत्रान्तरे, अस्माकं विद्यालयस्य अध्यापकाः छात्रान् (iv)..... मुम्बई नगरस्य समीपे एव एकस्मिन् द्वीपे (v)..... इति गुहां प्रति नेष्यन्ति। अत्र (vi)..... शिवमन्दिराणि सन्ति। अहम् अपि तत्र (vii)..... इच्छामि । एतदर्थम् अस्माभिः (viii)..... रुप्यकाणि दातव्यानि सन्ति। अहं प्रार्थयामि यत् कृपया (ix)..... पञ्चशतं रूप्यकाणि धनादेशद्वारा प्रेषयतु।
गृहे सर्वेभ्यः मम (x) ..... निवेदनीयः।

भवतां प्रियपुत्री
मानसी

मञ्जूषा - गन्तुम्, नमो नमः, शीघ्रमेव, प्रथमसप्ताहे, अर्धवार्षिकपरिक्षा, प्राचीनानि, प्रणामान्, पञ्चशतम्, शैक्षणिकभ्रमण-यात्रायै, एलोरा ।

प्रश्नः 3. अधः प्रदत्तं चित्रं दृष्ट्वा मञ्जूषायां प्रदत्तपदानां सहायतया संस्कृतेन पञ्च वाक्यानि लिखत- (1x5=5)



मञ्जूषा - मन्दिरस्य, मेघः, वृक्षाः, दुःखी, एका महिला, मन्दिरस्य समीपे, आपणस्य पुरतः, मनुष्यौ, खगाः, मातरं पृच्छति, मन्दिरस्य अन्तः, प्रतिमा

प्रश्नः 4. अधोलिखितानि वाक्यनि संस्कृतभाषया अनुवादं कृत्वा लिखत - (केवलं पञ्चवाक्यानि) (1x5=5)

(क) लड़कियाँ हमेशा हँसती हैं ।
(ख) तुम सब बगीचे में खेलो।
(ग) कल संस्कृत की परीक्षा होगी।
(घ) राम को परिश्रम करना चाहिए।
(ङ) रमा पत्र लिखकर पढ़ती है।
(च) शिष्य को आशीर्वाद।
(छ) हम सब ने खाना खाया।

खण्ड: - ग (अनुप्रयुक्त-व्याकरणम्) 25 अङ्का:

प्रश्न: 5. अधोलिखितवाक्येषु रेखाङ्कितपदेषु सन्धिं सन्धिविच्छेदं वा कृत्वा पूर्णवाक्यं लिखत - (केवलं प्रश्नत्रयम्) **(1x3=3)**

(i) गुरूपदेश: सर्वोच्च: भवति। (iii) पर्यावरणाय **वृक्ष+आरोपणं** आवश्यकम् ।

(ii) छात्रा: **प्रश्नोत्तराणि** लिखन्तु। (iv) रात्रौ आकाशे **सप्त+ऋषि:** दृश्यते।

प्रश्न: 6. अधोलिखितवाक्येषु समुचितं शब्दरूपं चित्वा पूर्णवाक्यं लिखत - (केवलं प्रश्नचतुष्टयम्) **(1x4=4)**

(i) अधुना ..... खेलनाय गच्छाम: ।

(क) अहम् (ख) आवाम् (ग) वयम्

(ii) गणेश: प्रतिदिनं ..... नमति।

(क) पार्वतीभ्याम् (ख) पार्वतीम् (ग) पार्वती

(iii) ..... ! कृपया फलानि स्वीकरोतु।

(क) हे साधो ! (ख) साधव: (ग) हे साधू !

(iv) राजेश: ..... अभ्यासं करोति।

(क) गणितेन (ख) गणितस्य (ग) गणिते

(v) अहं ..... बालिकया सह गायामि।

(क) तस्या: (ख) ताभ्याम् (ग) तया

प्रश्न: 7. अधोलिखितवाक्येषु अङ्कानां स्थाने उपयुक्तं सङ्ख्यावाचकं संस्कृतपदं विकल्पेभ्य: चित्वा लिखत - **(1x3=3)**

(i) रावणस्य ..... (10) मुखानि सन्ति।

(क) दश (ख) एकदश (ग) दशानि

(ii) .....(3) बालिका: नृत्यन्ति।

(क) त्रय: (ख) तिस्र: (ग) त्रीणि

(iii) विद्यालये .....(39) शिक्षिका: सन्ति।

(क) नवत्रिंशत् (ख) त्रिनवति: (ग) नवचत्वारिंशत्

(iv) ..... (22) छात्रा: प्रतियोगितायां धावन्ति।

(क) द्वेद्वे (ख) द्वाविंशति: (ग) द्वादश

प्रश्न: 8. रेखाङ्कितपदेषु प्रयुक्तां विभक्तिं तत्कारणं च लिखत - (केवलं प्रश्नचतुष्टयम्) **(1x4=4)**

(i) माता **गृहं** प्रति गच्छति। (iv) वृद्ध: **कर्णाभ्यां** बधिर: अस्ति।

(ii) **छात्रायै** स्वस्ति। (v) **मन्दिरं** परित: वृक्षा: सन्ति।

(iii) अलम् **विवादेन।**

प्रश्न: 9. अधोलिखितवाक्येषु समुचितं धातुरूपं चित्वा लिखत - (केवलं प्रश्नचतुष्टयम्) **(1x4=4)**

(i) शिशु: मातरं .....।

(क) स्मरसि (ख) स्मरति (ग) स्मरामि

(ii) यूयं पाठस्य प्रश्नान् .....।

(क) पृच्छतु (ख) पृच्छानि (ग) पृच्छत

(iii) आवां दिल्लीनगरं .....।

(क) गमिष्याव: (ख) गमिष्यत: (ग) गमिष्यथ:

(iv) ते महिले .....।

(क) आसीत् (ख) आस्ताम् (ग) आसन्

(v) राजेश: शयनं .....।

(क) कुर्या: (ख) कुर्याम् (ग) कुर्यात्

प्रश्न: 10. अधोलिखितेषु वाक्येषु रेखाङ्कितपदेषु प्रकृति-प्रत्ययौ संयोज्य विभज्य वा पूर्णं वाक्यं लिखत - (केवलं प्रश्नत्रयम्) **(1x3=3)**

(i) रमा सिहं **दृष्ट्वा** धावति।

(ii) अहं सैनिक: भू **+ तुमुन्** इच्छामि।

(iii) निधि: **सं+नम्+ल्यप्** पठति।

(iv) उमेश: भोजनं सं**कृत्य** विश्रामं करोति।

प्रश्न: 11. मञ्जूषात: उचितम् अव्ययपदं चित्वा वाक्येषु रिक्तस्थानानि पूरयत पूर्णं च वाक्यं लिखत - (केवलं प्रश्नद्वयम्) **(1x2=2)**

(i) त्वं ..... तत्र गच्छसि ?

(ii) बाला: क्रीडांगणे ..... खेलन्ति।

(iii) यदा रात्रि: भवति ..... चन्द्र: उदयति।

मञ्जूषा - तदा, सर्वत्र, किमर्थम् ।

प्रश्न: 12. अधोलिखितेषु वाक्येषु रेखाङ्कितपदेषु उपसर्गं संयोज्य विभज्य वा लिखत - (केवलं प्रश्नद्वयम्) **(1x2=2)**

(i) मनुष्य: बुद्धे: **उपयोगं** कुर्यात्।

(ii) **अनु+प्रीता** गीतं गायति ।

(iii) दुर्जन: **दुर् + व्यसनी** भवति।

खण्ड: - घ (पठित-अवबोधनम्) 30 अङ्का:

प्रश्न: 13. अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि लिखत - **(5)**

चटका तस्य सहर्षं स्वागतं करोति | सर्वं च अवगम्य कथयति - "भ्रातः! चिन्तां मा कुरु | अहं सर्वं अवगच्छामि | अहं तव प्रतिक्षायां आसम् | अन्तः आगच्छतु |" काकः लज्जितः भवति | चटका पुनः कथयति- "भ्रातः! चिन्तां त्यजतु | आनन्देन भोजनं करोतु | वर्षापर्यन्तम् आवाम् मिलित्वा अत्र स्थास्यावः | स्वागतं तव | भोजनं करोतु |" लज्जितः काकः भोजनं करोति | सः चिन्तयति- "अहम् तु स्वार्थी अस्मि, परम् एषा उदारहृदया अस्ति |" वर्षाकालात् अनन्तरं काकः पुनः नवीन गृहस्य निर्माणं करोति | चटका अपि साहाय्यं करोति | उभौ मिलित्वा सुखेन वसतः | सत्यम् एव कथितम्- **"उदारचरितानां तु वसुधैव कुटुम्बकम् |"**

अ) एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्) **(½x2=1)**

(i) काक: कस्य निर्माणं करोति**?**

(ii) लज्जित: काक: किं करोति?

(iii) उभौ मिलित्वा कथं वसन्ति?

आ) पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम्) **(1x2=2)**

(i) का काकस्य सहर्षं स्वागतं करोति**?**

(ii) काक: किं चिन्तयति?

(iii) सत्यम् एव किं कथितम्?

ई) निर्देशानुसारम् उत्तरत - (केवलं प्रश्नत्रयम्) **(1x2=2)**

(i) 'चटका अपि साहाय्यं करोति' अस्मिन् वाक्ये कर्तृपदं किम् अस्ति?

(क) चटका (ख) अपि (ग) साहाय्यम्

(ii) **'परम् एषा उदारहृदया अस्ति'** अस्मिन् वाक्ये विशेषणपदं किम् अस्ति?

(क) परम् (ख) एषा (ग) उदारहृदया

(iii) **'दु:खेन'** इति पदस्य किं विलोमपदं गद्यांशे प्रयुक्तम् ?

(क) मिलित्वा (ख) लज्जित: (ग) आनन्देन

प्रश्न: 14. अधोलिखितं श्लोकं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि लिखत - (5)

पापान्निवारयति योजयते हिताय गूह्यं निगूहति गुणान्प्रकटीकरोति |
आपद्गतं च न जहाति ददाति काले सन्मित्रलक्षणमिदं प्रवदन्ति सन्तः ||

अ) एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्) (½x2=1)

(i) सन्मित्रं कस्मात् निवारयति ? (iii) के पदं न प्रविचलन्ति ?

(ii) सन्मित्रं कस्मै योजयते ?

आ) पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम्) (1x2=2)

(i) सन्मित्रं किं निगूहति? (iii) के सन्मित्रलक्षणं प्रवदन्ति?

(ii) सन्मित्रं कान् प्रकटीकरोति?

ई) निर्देशानुसारम् उत्तरत - (केवलं प्रश्नत्रयम्) (1x2=2)

(i) **'सन्मित्रम् आपद्गतं च न जहाति'** अस्मिन् वाक्ये क्रियापदं किम् ?

(क) सन्मित्रम् (ख) आपद्गतम् (ग) जहाति

(ii) **'सज्जना:'** इति पदस्य किं पर्यायपदं श्लोके प्रयुक्तम् ?

(क) सन्मित्रम् (ख) गूह्यम् (ग) सन्त:

(iii) **'सन्तः सन्मित्रलक्षणमिदं प्रवदन्ति' अस्मिन् वाक्ये कर्तृपदं किम् अस्ति?**

(क) सन्मित्रम् (ख) सन्त: (ग) प्रवदन्ति

प्रश्न: 15. अधोलिखितं नाट्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि लिखत - (5)

प्रणवः - संस्कृतम् इति पदस्य कः अर्थः ?

विश्वासः - 'शुद्धम्' 'परिष्कृतम्' इति संस्कृतपदस्य अर्थः अस्ति |

सुमेधा - संस्कृतभाषायाः कति रूपाणि सन्ति ?

प्रबुद्धः - संस्कृतभाषायाः द्वे रूपे स्तः | एकं वैदिकं संस्कृतम् द्वितीयं च लौकिकं संस्कृतम् |

प्रणवः - वैदिकसंस्कृतस्य किं प्रमुखं साहित्यम् अस्ति ?

निष्ठा - चत्वारः वेदाः ब्राह्मणग्रन्थाः आरण्यक-ग्रन्थाः उपनिषदः च वैदिकं साहित्यं कथ्यते |

सुमेधा - लौकिक संस्कृतस्य आरम्भः कदा अभवत् ?

विवेकः - वाल्मीकेः कालात् लौकिक संस्कृतस्य प्रारम्भः मन्यते | अस्य कृतिः 'रामायणं' लौकिकसंस्कृतस्य आदिमः ग्रन्थः अस्ति |

प्रणवः - लौकिकसंस्कृतस्य अन्ये प्रमुखा: ग्रंथाः के ? के च तेषां प्रणेतारः ?

प्रज्ञा - महाभारतं व्यासेन विरचितम् |

रमेशः - रघुवंशं कुमारसंभवं च कालिदासेन रचिते महाकाव्ये |

अ) एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्) (½x2=1)

(i) संस्कृतभाषायाः कति रूपाणि सन्ति? (iii) महाभारतं केन विरचितम्?

(ii) रघुवंशं कुमारसंभवं च केन रचिते महाकाव्ये?

आ) पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम्) **(1x2=2)**

(i) वैदिकं साहित्यं किम् अस्ति? (iii) संस्कृतभाषायाः के द्वे रूपे स्तः?

(ii) लौकिकसंस्कृतस्य आदिमः ग्रन्थः कः अस्ति?

ई) निर्देशानुसारम् उत्तरत - (केवलं प्रश्नद्वयम्) **(1x2=2)**

(i) 'संस्कृतभाषायाः द्वे रूपे स्तः' अस्मिन् वाक्ये क्रियापदं किम् अस्ति?

(क) द्वे (ख) रूपे (ग) स्तः

(ii) '**अन्तः**' इति पदस्य किं विलोमपदं संवादे प्रयुक्तम् ?

(क) आदिमः (ख) प्रारम्भः (ग) वैदिकम्

(iii) '**वैदिकं**' इति पदस्य किं विशेषणपदं संवादे अस्ति?

(क) साहित्यम् (ख) उपनिषदः (ग) रामायणम्

प्रश्नः 16. अधोलिखितं श्लोकं पठित्वा उचितपदैः रिक्तस्थानानि पूरयित्वा पूर्णम् अन्वयं लिखत - (½x4=2)

निन्दन्तु नीतिनिपुणाः यदि वा स्तुवन्तु लक्ष्मीः समाविशतु गच्छतु वा यथेष्टम् ।
अद्यैव वा मरणम् अस्तु युगान्तरे वा न्यायात्पथः प्रविचलन्ति पदं न धीराः ॥

अन्वयः - नीतिनिपुणाः यदि (i)..... स्तुवन्तु वा, लक्ष्मीः समाविशतु, (ii)..... वा गच्छतु, मरणम् अद्यैव अस्तु (iii)..... वा, धीराः न्यायात् पथः (iv)..... न प्रविचलन्ति ।

मञ्जूषा - युगान्तरे, यथेष्टं, पदं, निन्दन्तु ।

प्रश्नः 17. अधोलिखितेषु वाक्येषु रेखाङ्कितपदानि आधृत्य प्रश्ननिर्माणं कृत्वा पूर्णं वाक्यं लिखत - (1x5=5)
(केवलं प्रश्नचतुष्टयम्)

(क) **नद्याः** जलं प्रदूषितं न करणीयम्। (घ) महर्षि **भारते** सर्वत्र अभ्रमत्।

(ख) **छात्रैः** एका प्रश्नोत्तरी आयोजिता। (ङ) काकः **नवीनगृहस्य** निर्माणम् अकरोत्।

(ग) उत्तमाः **मानम्** इच्छन्ति।

प्रश्नः 18. अधोलिखितानि वाक्यानि कथाक्रमानुसारं संयोज्य पूर्णानि वाक्यानि लिखत, केवलं क्रमसंख्या न लेखनीया- **(½x6=3)**

(क) एकः यात्री महर्षिं दुर्वचनानि वदति स्म।

(ख) महर्षिः सत्यार्थप्रकाशम् ग्रन्थं रचितवान् ।

(ग) शिष्यः चिन्तयति - किमर्थं तस्मै एतानि फलानि ?

(घ) महर्षिः भारते सर्वत्र अभ्रमत्।

(ङ) महर्षिः तस्मै फलानि प्रेषयति।

(च) महर्षिः काशीनगरे अतिष्ठत्।

प्रश्नः 19. अधोलिखितानां पदानां समुचितार्थकं पदं मञ्जूषातः चित्वा समक्षं लिखत - **(1x5=5)**

(i) विश्वे

(ii) रचितम्

(iii) वसुन्धरायाः

(iv) निरामयाः

(v) आदिमः

मञ्जूषा - रोगरहिताः, संसारे, प्रथमः, लिखितम्, भूमेः ।

.....इति.....